International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 91-97
© 2021 IJSR
www.anantaajournal.com
Received: 19-09-2021
Accepted: 21-10-2021

**Tarun Kumar Samanta**
MA, B.Ed., PGDMP, MPhil. PhD.(Pursuing), State Aided College Teacher, Bagnan College, Bagnan, Howrah, West Bengal, India

**Corresponding Author:**
**Tarun Kumar Samanta**
MA, B.Ed., PGDMP, MPhil. PhD.(Pursuing), State Aided College Teacher, Bagnan College, Bagnan, Howrah, West Bengal, India

# घटकर्परकृताया घटकर्परकाव्यस्य टीकायाः सम्पादनम्

**Tarun Kumar Samanta**

**शोधसारः**
घटकर्परकाव्यं सुप्रसिद्धखण्डकाव्यमेकम् । ग्रन्थादौ षट्सु श्लोकेषु वृष्टेः विर्णनमस्ति, अन्तिमे श्लोके कवेः स्वस्य यमकालङ्कारनैपुण्यं ख्यापितम् । अवशिष्टेषु श्लोकेषु नायिकायाः पतिविरहजनितस्य दुःखस्य विर्णनमस्ति । प्रावृषि मेघानामुदयं समुद्दिश्य स्वकल्पितया कल्पनया मदनाकुला सती प्रियसखीं पुरस्कृत्य विरहिणी तत्कविर्दर्शयन्नाह - निचितमित्यदि एकविंशतिः श्लोकाः ।

**कूटशब्दाः** छन्दः, हस्तलिखितम्, पुथिः पाण्डुलिपिः वा, सम्पादनम्

## प्रस्तावना

### उपोद्धातः

घटकर्परेण विरचितं काव्यं घटकर्परकाव्यम् । काव्यमिदं मेघदूतस्य भावानुकरनेन प्रणीतं तद्विपरीतकाव्यम् । सुन्दरी-वसन्ततिलकादिभिः छन्दभिः काव्यमिदं ग्रथितम् । काव्येऽस्मिन् एकविंशतिः श्लोकोऽस्ति (मतान्तरे द्वाविंशच्छ्लोकाः) । प्रतिश्लोकमत्र यमकस्य चमत्कारः । । काव्यस्य भाषा संस्कृतम् । टीकाया च भाषा संस्कृतम् । काव्यमिदं वहुजनसमादृतं यतः इदमवलम्व्य वहवः टीकाः रचिताः स्युः । दिवाकर-ताराचन्द्र-गोविन्दज्योतिर्विद-प्रभृतयः सुप्रसिद्धाः टीकाकाराः । वहुविदग्धजनेषु रचितेषु सुप्रसिद्धेषु टीकासु मया सम्पादनकृता टीकापि सुप्रसिद्धा उत्कृष्टा च ।

अस्यां टीकायां टीकाकारस्य नाम लिपिकारस्य च नाम नास्ति । एयासियाटिकसोसाइटि इति स्थाने टीकेयं संरक्षिता अस्ति । हस्तलिखितटीकाया विवरणम् एवमेव-

| | | |
|---|---|---|
| Mss No./ Acc No. | : | G-154 |
| Tittle | : | Ghaṭa-karpara-kāvya-ṭīkā |
| Other Tittle | : | - |

| | | |
|---|---|---|
| Author | : | Ghaṭa-karpara |
| Commentary | : | Anonymous |
| Commentator | : | - |
| Scribe | : | - |
| Owner | : | - |
| Subject | : | Kavyaṃ |
| Language | : | Sanskrit |
| Script | : | Bengali |
| Date | : | - |
| Complete/ Incomplete | : | Complete |
| Meterial | : | Country-made Paper |
| Size in cm/ inches | : | 14¾ × 3½ |
| Folio/ Page | : | 3 |
| Lines | : | In tripāṭha form |
| Slokas | : | 200 |
| Double foliation | : | - |
| Missing Portion | : | - |
| Condition | : | Tolerable |
| Remarks | : | Government Collection. |

गुरुत्वम् - प्राचीने काले कवयः वहुविधा काव्य-नाटक-टीकादयः लिखितवन्तः । अधुनापि सर्वानि न सम्पादितानि । सम्पादनमाध्यमेन असम्पादितपुथिः पाठकं निकषा सहजलभ्यः भवति । अद्यापि पाण्डुलिपीणां सहस्रानि असम्पादिताः । एतन्निमित्तं वहुविधानि काव्यनाटकादीनि तथ्यानि च अद्याप्यस्मान्निकषाज्ञातानि । अपि च मया सम्पादनकृता घटकर्प्परकाव्यटीका अद्यापि असम्पादितासीत् । सम्पादनमाध्यमेन एतस्याः घटकर्प्परकाव्यटीकायाः सहजलभ्यता पाठकं निकषा भविष्यति । अपि च वहुविधानि अज्ञातानि तथ्यानि प्रकाशितानि भविष्यति । अहं मन्ये अनया टीकया घटकर्प्परकाव्यपठनं सुखकरं भविष्यति ।

**घटकर्प्परकाव्यटीका**

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः।
सलिलैर्विहतं रजः क्षितौरविचन्द्रावपि नोपलक्षितौ।। ०१ ।।

अन्वयः - प्रियहीनाहृदयावनीरदैः नीरदैः उपेत्य खं निचितम्, सलिलैः क्षितौ रजः विहितम्, रविचन्द्रौ अपि न उपलक्षितौ ।। ०१ ।।

टीका - नमः शिवाय ।। निचितामित्यादि नीरदैर्मध्यैः खम् आकाशं निचितं व्याप्तं आच्छादितमिति यावत् किं कृत्वा उपेत्य आगम्य नीरदैः किं विशिष्टैः प्रियभर्ता तेन रहिता तस्या हृदयमेव अवनी पृथ्वीतां रदन्ति विद्यारयन्तीत्यर्थः। सलिलैः क्षितौ पृथिव्यां रजोधूलिनिहितं विनाशितमिति यावत् न केवलं रजो निहितम् अपि निश्चितं रविचन्द्रो नोपलक्षितौ न दृश्यौ मेघैव्याप्तत्वात् नीरं जलं ददातीति नीरदः अतोऽनुपसर्गात् कः ।। ०१ ।।

हंसा नदन्मेघभयात् द्रवन्ति निशामुखान्यद्य न चन्द्रवन्ति
नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमा नदन्ति ।। ०२ ।।

अन्वयः - हंसा नदन्मेघभयात् द्रवन्ति । अद्य कुन्दसमानदन्ति निशामुखानि चन्द्रवन्ति न । नवाम्बुमत्ताः शिखिनः मेघागमे नदन्ति ।। ०२ ।।

टीका - हंसा इत्यादि । कुन्दं कुन्दपुष्पं तेनसमानदन्ताः यस्याः सा कुन्दसमानदन्ति अद्य मेघागमे वर्षाकाले हंसा पक्षिविशेषाः समानं सरोवरं द्रवन्ति गच्छन्तीत्यर्थः कस्मात् नदन्मेघभयात् अद्य निशामुखानि न चन्द्रवन्ति नभवन्ति घनान्धकारत्वात् निशारजन्यस्तासां मखानि निशामुखानि न केवलं हंसा द्रवन्ति शिखिनो मयूराः नवाम्वुमत्ता हर्षिताः सन्तः नदन्ति शव्दं कुर्वन्ति इत्यर्थः। श्री रामो जयति।। ०२ ।।

मेघावृतं निशि न भाति नभो वितारं
निद्राऽभ्युपैति च हरिं सुखसेवितारम् ।
सेन्द्रायुधश्च जलदोऽद्य रसन्निभानां
संरम्भमावहति भूधरसन्निभानाम् ।। ०३ ।।

अन्वयः - निशिमेघावृतं वितारं नभः न भाति । सुखसेवितारं हरिं निद्रा अभ्युपैति च । अद्य सेन्द्रायुधः जलदश्च रसन् भूधरसन्निभानां इभानां संरम्भम् आवहति।। ०३ ।।

टीका - मेघावृतमित्यादि । मेघनिशिरात्रौ मभः आकाशं न भाति न दीप्तिं करोति । किम्भूचं नभः मेघावृतं मेघैरावृतं व्याप्तमिति यावत् पुनः किम्भूतं वितारं विगतास्तारानक्षत्राणि यत्रेति विग्रहः हरिं विष्णु** शीघ्रं निन्दां अभ्युपैति अभ्युपगच्छति अत्रा कत्री चकारः समुच्चये किम्भूता निद्रासुखसेविता सुखेन सेविता । कचिल्लक्ष** सहसुप्तत्वात् सुखसेवितारं हरिमिति इन्द्रायुधेन सह वर्त्तते सेन्द्रायुधो जलदो मेघः रसन गर्जन सन इभानां हस्तिनां संरम्भं आरम्भं आवहिधारयरीत्यर्थः इभानां किम्भृतानां भूधरसन्निभानां पर्व्वतसदृशानाम् ।।०३।।

सतडिज्जलदार्पितं नगेषु
स्वनदम्भोधरभीतपन्नगेषु ।
परिधीररवं जलं दरीषु
प्रपतत्यद्भुतरूपसुन्दरीषु ।। ०४ ।।

अन्वयः - स्वनदम्भोधरभीतपन्नगेषु नगेषु अद्भुतरूपसुन्दरीषु दरीषु परिधीररवं सतडिज्जलदार्पितं जलं प्रपतति ।। ०४ ।।

टीका - दरीषु कुन्दुषु परिघोररवं यथा स्यात् परिसर्व्वतोभावेन घोररवं तथा जनं प्रयतति दरदीकं भूतासु अद्भूतकपासुन्दरीषु अद्भूतकपाः सुन्दर्योयासुतास्वित्यर्थः जनं किं विषिष्टं नगेषु पर्वतेषु सत*** नार्पितं तडितासहवर्तते स तडितसतडि*** सौजनदश्चेति तेन अर्पितं निहितं नगेषु किं भूतेषु खनदम्भोधरभीतिपन्नगेषु खन नश्चतेऽम्भधराश्चेति ते**भीतिर्येषां ये पन्नगा यत्रेति विग्रहः ।। ०४ ।।

क्षिप्रं प्रसादयति सम्प्रति कोऽपि तानि
कान्तामुखानि रतिविग्रहकोपितानि।
उत्कण्ठयन्ति पथिकाञ्जलदाः स्वनन्तः
शोकः समुद्भवन्ति तद्वनितास्वनन्तः।। ०५ ।।

अन्वयः - सम्प्रति कोऽपि रतिविग्रहकोपितानि तानि कान्तामुखानि क्षिप्रं प्रसादयति । जलदाः स्वनन्तः पथिकान् उत्कण्ठयन्ति । तद्वनितासु अनन्तः शोकः समुद्भवति च ।। ०५ ।।

टीका - क्षिप्रमित्यादि । संप्रति कोप्यनिर्व्वचनीयः कामीपुरुषः तानि प्रसिद्धानि कान्तामुखानि क्षिप्रं शीघ्रं यथा स्यात् प्रसादयति प्रसन्नतायां नयति किम्भूतानि मुखानि रतिविभ्रमकोपितानि खनन्तो गर्जन्तो जलदा मेघा पथिकान् उतकल्वयन्ति। तत्तु सवनितासु अनन्तोऽपर्य्यन्तः शोकोऽपि वर्द्धयति।।०५।।

छादिते दिनकरस्य भा-वने खाज्जले पतति लोकभावने ।
मन्मथे च हृदि हन्तुमुद्यते
प्रोषितप्रमदयेदमुद्यते ।। ०६ ।।

अन्वयः - दिनकरस्य भावने छादिते ; खात् शोकभावने जले पततिः मन्मथे हृदि हन्तुमुद्यते च प्रोषितप्रमदया इदम् उद्यते ।। ०६ ।।

टीका - छदिते इत्यादि । दिनकरस्य भावने भावसमूहे छादिते आछन्नेसति खात् आखाशात् पतति सति जले किम्भूते लोकभावने लोकानां भावनायत्रेति विग्रहः। किञ्च मन्मथे च काये हृदि हन्तुं प्रहतुमुद्यते तद्वते प्रपितस्य प्रमदया इदं वक्षमानमुद्यते निरुच्यते ।। ०६ ।।

सर्व्वकालमतिङ्ध्य तोयदा आगताः स्थ
दयितो गतो यदा ।
निर्घृणेन परदेशसेविना मारयिष्यथ न तेन
मां विना ।। ०७ ।।

अन्वयः - हे तोयदाः, सर्वकालम् अतिलङ्ध्य यदा दयितो गतः आगताः स्थ । निर्घृणेन परदेशसेविना तेन विना मां न मारयिष्यथ ? ।। ०७ ।।

टीका - सर्व्वकालमित्यादि । हेतो यदा मेघाः सर्वकालमवलम्व्य स्थित्वा यदा दयितः प्रियोगतः

तदा यूयम् अगताः स्थ इदानीं भवतां लिष्कलगमनमिति ध्वनितं तेन नायकेन विना मां न मारयिष्यथ तेन किंभूतेन परदेशसेविना विरहिनीनां दुस्तरोऽयं समयः ।। ०७ ।।

ब्रुत तं पथिकपांशुलं घना यूयमेव पथि शीघ्रलङ्घनाः।
अन्यदेशरतिरद्य मुच्यतां साऽथवा तव वधू किमुच्यताम् ।। ०८ ।।

अन्वयः - हे घनाः तं पथिकपांशुलं ब्रुत । यूयम् एव पथि शीघ्रलङ्घनाः । अद्य अन्यदेशरतिः मुच्यताम् अथवा सा तव वधूः किम् उच्यताम् ।। ०८ ।।
टीका - ब्रुततामित्यादि । हे घना हे मेघा तं पथिकपांशुणं व्रूतः। यूयं किम्भूताः पथि शीघ्रलङ्घनाः शघ्रगामिनः अद्य वर्षाकाले अदधुना अन्यदेशरतिः अन्यदेशप्रीतिर्मुच्यतां ज्यताम् अथ वा सा तव वधूस्तव कान्ताकिमुच्यतां किं कथ्यतां त्वया कान्तोन मया वा इत्यगन्तव्य । वधूःश्नातादि भार्य्यायां वधूः सामान्ययोषितेति ।। ०८ ।।

हंसपंक्तिरपि नाथ संप्रति
प्रस्थिता वियति मानसंप्रति।
चातकोऽपि तृषितोऽम्वु याचते
दुःखिता पथिक सा प्रिया च ते ।। ०९ ।।

अन्वयः - हे नाथ ! हंसपंक्तिः अपि संप्रति वियति मानसं प्रति प्रस्थिताः, चातकः अपि तृषितो अम्वु याचते । हे पथिक ! सा ते प्रिया च दुःखिता [त्वदागमनं याचते] ।। ०९ ।।
टीका - हंस इत्यदि। अपि शव्दः सम्भावनायां हे पथिक सा च ते तव प्रिया दुःखिता मेघदर्शनादिति भावः हे नाथ हंसपंक्तिरपि संप्रतिमानसं सरोवरं प्रस्थिता कुत्र वियति आकाशे चातकोऽपि हसितः स न अम्वु जलं याचते ।। ०९ ।।

नीलशष्पमतिभाति कोमलं
वारि विन्दति च चातकोऽमलम्।
अम्बुदैः शिखिगणो विनाद्यते
का रतिः प्रिय मया विनाऽद्यते ।। १० ।।

अन्वयः - कोमलं नीलशष्पम् अतिभाति; चातकः च अमलं वारि विन्दति । अम्बुदैः शिखिगणः विनाद्यते; हे प्रिय ! मया विना अद्य ते का रतिः ? ।। १० ।।
टीका - नील इत्यादि । नीलञ्च तत शम्पञ्चेति नीलशम्पं वालतृणं शम्पं वालतृणं घास इत्यामरः। नीलशम्पं तृणमितिभाति शोभते किम्भूतं नीलशम्पं कोमलं नूतनं चातकोऽपि पक्षी अमलं निर्मलं वारिविन्दति नमते अम्वुदैर्मेघैः शिखिगणो मयूरसमूहो विना अद्य ते अद्यवर्षाकाले दयितया विना का रतिः का प्रीतिः ।। १० ।।

मेघशब्दमुदिताः कलापिनः
प्रोषिताहृदयशोकलापिनः ।
तोयदागमकृशा च साऽद्य ते
दुर्धरेण मदनेन साद्यते ।। ११ ।।

अन्वयः - मेघशब्दमुदिताः कलापिनः प्रोषिताहृदयशोकलापिनः । तोयदागमकृशा ते सा अद्य दुर्धरेण मदनेन साद्यते ।। ११ ।।
टीका - मेघ इत्यादि । मेघशव्देन मुदिता हर्षिताः कलापिनः मयूरा भावन्तीति शेषः कलापे येषां सन्तीति कलापिनः कलापे येषां सन्तीति कलापिनः कलापे भूषणे वर्त्तते किम्भूताः प्रेषिताः हृदयशो कलापिनः प्रोषिताया हृदयशो कं नापि तुं शीलं येषामिति विग्रहः प्रोपिताया हृदयस्य शोकं नपयन्तीति अद्य वर्षाकाले ते तव कान्ता तो यदा गमकृशा दुर्वला तो यदा कामेन कृश तो यदा गमकृशान केवलं तो यदा सादुर्धरेण मदनेन सासद्यते तन्वीक्रियते दुस्मरेन इति च समुच्चये च कारः।।११।।

कि कृपाऽपि तव नास्ति कान्तया
पाण्डुगण्डपतितालकान्तया ।
शोकसागरजलेऽद्य पतितां
त्वद्गुणस्मरणमेव पाति ताम् ।। १२ ।।

अन्वयः - पाण्डुगण्डपतितालकान्तया कान्तया किं तव कृपाऽपि नास्ति ? शोकसागरजले पतितां तां त्वद्गुणस्मरणमेव पाति ।। १२ ।।

टीका - किमित्यादि । किमिति प्रश्ने कान्तया करणभूतया तव कृपाति किं नास्ति तयी किम्भूतया पाण्डुगण्डपतितान् कान्तया पाण्डौ गण्डेन तौ पतितान कान्तौ यस्याः सा यथा अद्य वर्षाकाले शोकसागरजले पतितां कामेनेत्यहार्य्यां त्वद्गुणस्मरणमोव कर्तृता पातिरक्षति। किं क्रियापीति शोभनपाठः। अत्र पक्षे क्रियत इति क्रिया सी च क्रिया कर्मोद्यते तेनेयं व्याख्या कान्ताया क्रियापि कर्म्मापि प्रयोजनादि तव किं नास्तीति तृतीया शोभने पूर्व्वस्मिन् पाठे षष्ठी सप्तम्योरभावात् सुधियां न मनसः सुखं जनन इति ।। १२ ।।

कुसुमितकुटजेषु काननेषु
प्रियहितेषु समुत्सुकाननेषु ।
द्रवति च कलुषे जले नदीनां
किमिति च मां समवेक्षसे न दीनाम्।। १३ ।।

अन्वयः - काननेषु कुसुमितकुटजेषु, प्रियरहितेषु समुत्सुकाननेषु नदीनां द्रवति जले कलुषे च दीनां मां किमिति न समवेक्षसे च ।। १३ ।।

टीका - कुसुमित इत्यादि ।। काननेषु केति काननेषु कुसुमितकुटजेषु सतसु कुसुमिताः पुष्पिताः कुटजतरवो येषु पुनः किं भूतेन प्रियरहितेषु प्रीणातीति प्रियः प्रियेण केनापि नायकेन हीनेषु एतेन सतीत्वं ख्यापयतीति ध्वनितं किम्भूतं सत्सु केति काननानि भूर्ये, नदीनां कलुषे जले अनिर्म्माने वहति सति कलुषोऽस्वच्छ अविमल इत्यमरः किमिति च कस्माद्धेतोः मां नसमवेक्षसे न पश्यसि एवं भूतेऽपि समये कथं नागच्छसीत्यर्थः अनुकम्पसह इति पाठः मां किम्भूतां दीनां दुःखितां च कारोऽन्योन्यार्थे समुच्चयार्थः ।। १३ ।।

मार्गेषु मेघसलिलेन विना शितेषु
कामो धनुः स्पृषति तेन विना शितेषु ।
गम्भीरमेघरसितव्यथिता कदाहं
जह्यां सखिप्रियवियोगजशोकदाहम् ।। १४ ।।

अन्वयः - मेघसलिलेन मार्गेषु विनाशितेषु तेन विना कामः शितेषु धनुः स्पृशति । गम्भीरमेघरसितव्यथिता अहं कदा सखिप्रियवियोगजशोकदाहम् जह्याम् ।। १४ ।।

टीका - मार्गेष्वत्यादि ।। मार्गोषु वत्मेषु मेघसलिलेन विना शितेषु च्छन्नेषु तेन प्रोषितेन प्रियेन विना कामोधेनुः स्पृशति गृह्णाति किम्भूतं धनु शितेषु शितास्तीक्ष्णा इषवः शरा यस्या तन्तथा हे सखि अहं प्रियवियोगजशो कदाहं कदा **** परित्यक्तामि प्रियोभर्ता तस्य वियोगः विछेदस्तस्माज्जातः प्रियवियोगजः प्रियवियोगजश्चासौ शोकश्चेति तस्य दाह इ विग्रहः। किम्भूतात्वं गम्भीरमेघवसितच्यर्थिता गम्भीरश्चासौ मेघश्चेति तस्य रतिः तेन शव्देन च्यार्थिता कामपीडामापन्नावसित इति भावे क्तः। जह्यामिति जाहातेर्निजिरूपम् ।। १४ ।।

सुसुगन्धितया वनेऽजितानां
स्वनम्भोधरवातवीजितानाम्।
मदनस्य कृते निकेतकानां
प्रतिभान्तीह बनानि केतकानाम् ।। १५ ।।

अन्वयः - इह सुसुगन्धितया वने अजितानां स्वनदम्भोधरवातबीजितानां मदनस्य कृते निकेतकानां केतकानां बनानि प्रतिभान्ति ।। १५ ।।

टीका - सुसुगन्धीत्यादि । अद्य अधुना निकेतकानां वनाप्रतिभान्ति शोभन्ते कीदृसं सुसुगन्धीतया केरपि वीनेजितानां खनः किम्भूतानां खनदम्भोधरवातवीजितानां खनन्तश्चाते अम्भोधराश्चेति तेषां वा तेन वीजितानां पुनः

किम्भूतानां मदनस्य कृते निकेतनानां मदनस्य कामदेवस्य कृते निमित्तस्थानभूतानां सुशव्दोऽतिशये।। १५ ।।

तत् साधु यत्त्वां सुतरां ससर्ज
प्रजापतिः कामनिवास सर्ज ।
त्वं मञ्जरीभिः प्रबरो वनानां
नेत्रोत्सवश्चासि सयौवनानाम् ।। १६ ।।

अन्वयः - (हे) कामनिवास सर्ज ! प्रजापतिः यत् त्वां ससर्ज तत् सुतरां साधु । वनानां प्रबरः त्वं मञ्जरीभिः सयौवनानां नेत्रोत्सवः च असि ।। १६ ।।
टीका - त्यामित्यादि । हे सर्ज्ज हे शानवृक्षकामनिरासकन्दपश्रिय इति मत्वा प्रजापतिर्वह्मा यत त्वां ससर्ज्जसृष्टवान् तत साधु शोभनम् अतिभरामतिशयेन यतो वनानां मध्ये मञ्जरीभिर्नव*** पल्लवैस्त्वं प्रवरः श्रेयान् सयौवनानां स्त्रीणां नेत्रोत्सवः नयनोतसव ****** त्वम् प्र***रित्यथः ।। १६ ।।

नवकदम्ब शिरोऽवनतास्मि ते
वसति ते मदनः कुसुमस्मिते।
कुटज किं कुसुमैरुपहस्यते
प्रणिपतामि च दुष्प्रसहस्यते ।। १७ ।।

अन्वयः - (हे) नवकदम्ब ! ते शिरोऽवनता अस्मि । ते कुसुमस्मिते मदनः वसति । (हे) कुटज ! कुसुमैः किम् उपहस्यते ? दुष्प्रसहस्य ते प्रणिपतामि।।१७।।
टीका - नवकदम्वेत्यादि ।। नवश्चासौ कदम्वश्चेति विग्रहः हो नव कदम्व अभिनवपुष्पिततते तव कुसुमस्मिते यद्यस्मान्मदनो वसति तिष्ठति कु**** प्रह्लादकत्व द्वोयपः अतएव ते*** शिरोऽवनतास्मि शिरसा प्रणतास्मि हे कुटज कु***मैः किमुपहस्यते यादृशो विरहिजनस्तया इति विशेष ते तव दुष्पसहस्य अतिशयदुःसहस्य सुगन्धितया प्रपतितास्मि तव चरणे प्रपतितास्मीति योज्यम्।।१७।।

तरुवर विनतास्मि ते सदाऽहं
हृदयं मे प्रकरोषि किं सदाहम्।
तव कुसुमनिरीक्षणेऽपदेऽहं
विसृजेयं सहसैव नीप देहम् ।। १८ ।।

अन्वयः - (हे) तरुवरनीप ! अहं ते सदा विनता अस्मि । मे हृदयं किं सदाहं प्रकरोषि ? तव कुसुमनिरीक्षणे अहम् अपदे सहसा एव देहं विसृजेयम् ।। १८ ।।
टीका - तरुवरेत्यादि । हे तरुवर हे वृक्षश्रेष्ट अहं सदा तेत्तु खं विनतास्मि तस्मादेवं भूताया मे मम हृदयं देहं सदाहं दाहसहितं किं प्रकारोषि हे नीपकदम्ववृक्ष तव कु**मानिरीक्षणापदे विपत्तिस्थाने सहसैव देहं विसृजेयं त्यजामि ।। १८ ।।

कुसुमैरुपशोभितां सितै-
र्घनमुक्ताम्बुलवप्रहासितैः।
मधुनः समवेक्ष्य कालतां
भ्रमरश्चुम्वति यूथिकालताम् ।। १९ ।।

अन्वयः - भ्रमरः मधुनः कालतां समवेक्ष्य सितैः घनमुक्ताम्बुलवप्रहासितैः कुसुमैः उपशोभितां यूथिकालतां चुम्बति ।। १९ ।।
टीका - कुसुमेत्यादि ।। मधुनः पुष्परसस्य काले तां उत्पत्तिसयमत्वं समवेक्ष्य भ्रमरः युथिका न तां सितैः शुक्लैः कुसुमैरुपशोभितां किम्भूतैर्घनेन मेघेन मुक्त*** योऽम्वुनवो अम्वुकनास्तनप्रकाशितैः सुरभिः स्फुटकृतैः भ्रमरः नायकः युथिका नायिका इति।।१९।।

तासामृतुः सफल एव हि या दिनेषु
सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु।
रत्युत्सवं प्रियतमैः सह मानयन्ति
मेघागमे प्रियसखीश्च समानयन्ति ।। २० ।।

अन्वयः - या सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु दिनेषु प्रियतमैः सह रत्युत्सवं मानयन्ति ; मेघागमे

प्रियसखीश्च समानयन्ति ; तासाम् एव ऋतुः सफलः।। २० ।।

टीका - तासामित्यादि । तासां स्तीणां सर्व्वं एव *** सफलः हि शव्दो हे तौ याः स्तियः प्रियतमैः सह रत्युत्सवं मानयन्ति पूजयति प्रियसखीश्च समानय़न्ति सदृशी कुर्व्वन्ति कुत्र मेघागमे दिनेषु किं भूतेषु इन्द्रायुधसहिताम्वुधरस्य मेघस्य गर्ज्जितदुर्दिनेषु एतेन तदुक्तं याः प्रिया प्रियतमैः सह सर्व्वकालं निवसन्ति तासां षट्ऋतवः सफलाः।।२०।।

भावानुरक्तवनितासुरतैः शपेय-
मालम्ब्य चाम्बु तृषितः करकोशपेयम्।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ।। २१ ।।

अन्वयः - भावानुरक्तवनितासुरतैः करकोशपेयम् अम्बु आलम्ब्य च शपेयम् येन परेण कविना यमकैः जीयेय घटकर्परेण तस्मै उदकं वहेयम् ।। २१ ।।

टीका - भवानुरक्त इत्यादि । इदानीं कविः सगर्व्वं प्रकटयति परेण विपक्षेण कविना येन यमकैरहं जीयेय परिभूयेय*** कवये घटकर्परेण कविना भग्नकुम्भेन वा उदकं वहेयं एतदर्थं हषितः सन् करकोसपेयं अम्वुजलमानखभवानुरक्तवनितासुरतैः शपेयं शपथं करोमि भवानुरक्ता सा चासौ वनिता चेति सा तथा तस्याः सुरतैरितिविशेषः अतिदुष्करत्वात् कविनैषा वतिज्ञा कृतेन ।। २१ ।।

इति घटकर्प्पराख्या खण्डकाव्यटीका समाप्ता।

## अनुशीलितग्रन्थपञ्जी


1. Apte VS. The Student's English – Sanskrit Dictionary. Delhi: Motilal Banarsidass Publishers Private Limited 2009.
2. Bhattacharya GB. (1408 bangabda). Amarakosa (Amarartha- Candrika). Kolkata: Sanskrit Pustak Bhandar.
3. Dasgupta SN, De SK. A history of Sanskrit Literature-Classical Period. 2nd edition. Calcutta: University of Calcutta 1975.
4. Dev AT, Chaki JB. Stuudents' favourite Dictionary. English to Bengali and English. Calcutta: Dev Sahitya Kutir (P) limited 1997.
5. Gode PK. Descriptive Ctelogue of the Government Collections of Manuscripts. Volume-XIII: Part-1. Poona: Bhandarkar Oriental Research Institute 1440.
6. Monier –Williams M. (16th rpt.). A Sanskrit –English dictionary. Etymologically and philologically Arranged with special reference tocognate Indo-Eropean Languages. Delhi: Motilal Banarsidass Publishers Private Limited 2011.
7. Lahiri P, Sastri H. Paniniyam, A higher Sanskrit Grammar & Composition. Kolkata: The Dhaka Students' Library 2005.
8. Mukhopadhyaya G. (Rpt. Dec.). A New Tri-Lingual Dictionary. Sanskrit- Bengali-English. Kolkata: Milan Publicayions 2008.
9. Mukhopadhya G. (1419 Bangabda). Sanskrita Sahityer Itibritta. Kolkata: United Book Agency.
10. Raja KK. New Catalogus Catalogoram. Vol.-IX. Madras: University of madras 1977.
11. Shastri MH. Descriptive Catalogue of the Sanskrit Manuscripts. In the Collections of The Asiatic Society of Bengal. Vol.-VII. (kavya mns.). Calcutta: The Asiatic Society of Bengal 2006.
12. Vidyaratna GC. Sabdasara a Sanskrit –Bengali dictionary. 9th edition Calcutta: Shree Harischandra Kabiratna 1918.